श्री गायत्र्यष्टकं

श्री गायत्र्यष्टकं

विश्वामित्रपःफलां प्रियतरां विप्रालिसंसेवितां
नित्यानित्यविवेकदां स्मितमुखीं खंडेंदुभूषोज्ज्वलां |
तांबूलारुणभासमानवदनां मार्तांडमध्यस्थितां
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 1 ||

जातीपंकजकेतकीकुवलयैः संपूजितांघ्रिद्वयां
तत्त्वार्थात्मिकवर्णपंक्तिसहितां तत्त्वार्थबुद्धिप्रदां |
प्राणायामपरायणैर्बुधजनैः संसेव्यमानां शिवां
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 2 ||

मंजीरध्वनिभिः समस्तजगतां मंजुत्वसंवर्धनीं
विप्रप्रेंखितवारिवारितमहारक्षोगणां मृण्मयीं |
जप्तुः पापहरां जपासुमनिभां हंसेन संशोभितां
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 3 ||

कांचीचेलविभूषितां शिवमयीं मालार्धमालादिकान्
बिभ्राणां परमेश्वरीं शरणदां मोहांधबुद्धिच्छिदां |
भूरादित्रिपुरां त्रिलोकजननीमध्यात्मशाखानुतां
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 4 ||

ध्यातुर्गर्भकृशानुतापहरणां सामात्मिकां सामगां
सायंकालसुसेवितां स्वरमयीं दूर्वादलश्यामलां |
मातुर्दास्यविलोचनैकमतिमत्खेटींद्रसंराजितां
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 5 ||

संध्यारागविचित्रवस्त्रविलसद्विप्रोत्तमैः सेवितां
ताराहीरसुमालिकां सुविलसद्रत्नेंदुकुंभांतरां |
राकाचंद्रमुखीं रमापतिनुतां शंखादिभास्वत्करां
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 6 ||

वेणीभूशितमालकध्वनिकरैर्भृंगैः सदा शोभितां
तत्त्वज्ञानरसायनज्ञरसनासौधभ्रमद्भ्रामरीं |
नासालंकृतमौक्तिकेंदुकिरणैः सायंतमश्छेदिनीं
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 7 ||

पादाब्जांतररेणुकुंकुमलसत्फालद्युरामावृतां
रंभानाट्यविलोकनैकरसिकां वेदांतबुद्धिप्रदां |
वीणावेणुमृदंगकाहलरवान् देवैः कृतांछृण्वतीं
गायत्रीं हरिवल्लभां त्रिनयनां ध्यायामि पंचाननां || 8 ||

हत्यापानसुवर्णतस्करमहागुर्वंगनासंगमान्
दोषांछैलसमान् पुरंदरसमाः संच्छिद्य सूर्योपमाः |